शिक्षा निदेशालय ,राष्ट्रीय राजधानी क्षेत्र,दिल्ली
।। अभ्यास प्रश्न पत्र ।। 2024-25
कक्षा – अष्टमी
विषय: - संस्कृतम्

अवधिः होरासार्द्धद्वयम् पूर्णांकाः-६०

**सामान्य-निर्देशा: -**

- *सर्वे प्रश्नाः अनिवार्याः सन्ति।*
- प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एव लेखनीयानि ।
- उत्तराणि पृथक् उत्तरपुस्तिकायां क्रमानुसारं लेखनीयानि ।
- लेखने स्वच्छता स्पष्टता च स्यात् ।
- प्रश्नसंख्या अवश्यमेव लेखनीया ।
- प्रश्नपत्रे चत्वारः खण्डाः सन्ति -
  - खण्ड 'क' – अपठितावबोधनम् - 8 अङ्काः
  - खण्ड 'ख' – रचनात्मकलेखनम् - 12 अङ्काः
  - खण्ड 'ग' – अनुप्रयुक्तव्याकरणम् - 18 अङ्का:
  - खण्ड 'घ' – पठितावबोधनम् - 22 अङ्काः

खण्डः – 'क'
अपठित-अवबोधनम् ( **8** अङ्काः )

प्रश्न **1.** अधोलिखितम् अनुच्छेदं पठित्वा दत्तानां प्रश्नानाम् उत्तराणि लिखत -

तरवः अस्माकं जीवनं सुखमयं कुर्वन्ति । परन्तु अधुना वृक्षाणां संख्या प्रतिदिनं अत्यल्पा जायते । एषा स्थितिः चिन्तनीया अस्ति । पर्यावरणरक्षणाय हरितवृक्षाणां महती आवश्यकता वर्तते । मानववृक्षयोः अन्योन्याश्रयः सम्बन्धः अस्ति । वृक्षाणां जीवनम् एव अस्माकं जीवनम् । मानवसभ्यतायाः रक्षणार्थं वृक्षाणां रक्षा अस्माभिः करणीया । अतएव उच्यते - ' वृक्षो रक्षति रक्षितः " इति ।

**(i)** एकपदेन उत्तरत – **(** केवलं प्रश्नत्रयम् **)** **1x3=3**

1. के अस्माकं जीवनं सुखमयं कुर्वन्ति ?
2. अधुना केषां संख्या प्रतिदिनं न्यूना जायते ?
3. कः रक्षति रक्षितः ?
4. पर्यावरणरक्षणाय केषां महती आवश्यकता वर्तते?

**(ii)** पूर्ण वाक्येन उत्तरत –**(** केवलं प्रश्नमेकम् **)** **2x1=2**

1. कयोः अन्योन्याश्रयः सम्बन्धः अस्ति ?
2. कस्याः रक्षणार्थं वृक्षाणां रक्षा अस्माभिः करणीया ?

**(iii)** यथानिर्देशम् उत्तरत **-(** केवलं प्रश्नद्वयम् **)** **1x2=2**

1. 'एषा स्थितिः चिन्तनीया अस्ति ।' – अस्मिन् वाक्ये विशेषणपदं किम् ?

   (1) चिन्तनीया (ख) स्थितिः (ग) एषा

2. 'अति न्यूना' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

   (1) अतीव (ख) अस्माकम् (ग) अत्यल्पा

3. 'तरवः अस्माकं जीवनं सुखमयं कुर्वन्ति' – अस्मिन् वाक्ये क्रियापदं किम् ?

(1) अस्माकं (ख) सुखमयं (ग) कुर्वन्ति

**(iv)** अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। **1x1=1**

खण्डः – 'ख'

रचनात्मकलेखनम् ( **12** अङ्काः )

प्रश्न **2.** चित्रं दृष्ट्वा मञ्जूषातः पदानि चित्वा चत्वारि वाक्यानि लिखत - **2x4=8**



मञ्जूषा

हरितपट्टः, आसन्दिकाः, कक्षाकक्षस्य, द्वारं, अस्ति, घटिका, पुस्तकानि , सन्ति, लता , स्यूतकम्, वर्तते

अथवा

**"मम-परिचय:"** इति विषयम् अधिकृत्य चत्वारि वाक्यानि लिखत।

प्रश्न **3.**पदानि मेलनं कृत्वा वाक्य-रचनां कुरुत- **1x4=4**

| | | | |
|---|---|---|---|
| **1.** | अहं | कन्दुकेन | गच्छन्ति |
| **2.** | ते | पुस्तकं | खादसि |

https://www.evidyarthi.in/

| | | | |
|---|---|---|---|
| **3.** | त्वम् | विद्यालयं | क्रीडामि |
| **4.** | वयम् | फलं | पठाम: |

खण्डः – 'ग'

अनुप्रयुक्त-व्याकरणम्  ( **18** अङ्काः )

प्रश्न **4.** अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत –    ( केवलं प्रश्नत्रयम् )    **1x3=3**

**(i**) <u>वंशोद्योगः</u> अन्ताराष्ट्रीयख्यातिम् अवाप्तोऽस्ति।

(क) वंश+योगः    (ख) वंश+द्योगः    (ग) वंश+उद्योगः

(ii) अनन्तरं <u>तालपत्र+उपरि</u> लेखनकार्यम् आरब्धम्।

(क) तालपत्रोपरि    (ख) तालपत्रुपरि    (ग) तालपत्रौपरि

(iii) धन्या महीरुहा येषां विमुखं यान्ति <u>न + अर्थिनः।</u>

(क) नर्थीनः    (ख) नार्थिनः    (ग) नथिनः

(iv) यदाहं बाह्यतः आगमिष्यामि तदा त्वं माम् आकारयिष्यसि।

(क)यत्+अहम्    (ख) यदा+हम्    (ग) यदा+अहम्

प्रश्न **5.** प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत -    ( केवलं प्रश्नत्रयम् )    **1x3=3**

यथा –  गन्तुम्  **=**  गम्  **+**  तुमुन्

1. गत्वा  =  ..................+ .................
2. चल्+तुमुन् =  ....................................
3. पातुम्  =  ................ +..................
4. क्रीड्+क्त्वा  =  ....................................

प्रश्न **6.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत –
( केवलं प्रश्नत्रयम् )    **1x3=3**

1. सत्यम् ……………… जयते ।
2. परिश्रमं …………….. न लक्ष्यप्राप्तिः।
3. रामः लक्ष्मणः ……………. भ्रातरौ आस्ताम्।
4. जीवनं व्यर्थं ………….. कुरु।

| च , | एव , | मा , | विना |
|---|---|---|---|

प्रश्न **7.** उचितम् उपपदविभक्तियुक्तं पदं चित्वा रिक्तस्थानेषु लिखत – **( केवलं प्रश्नत्रयम् )** **1x3=3**

1. ...................... परितः वृक्षाः सन्ति । ( विद्यालय )

   (अ) विद्यालयेन (ब) विद्यालयस्य (स) विद्यालयम्

2. अहं ……………………. सह विद्यालयं गमिष्यामि। ( मित्र )

   (अ) मित्रम् (ब) मित्रेण (स) मित्रस्य

3. ……………… नमः। ( देव )

   (अ) देवात् (ब) देवे (स) देवाय

4. ……………… अभितः नदी वहति। ( ग्राम )

   (अ) ग्रामम् (ब) ग्रामेषु (स) ग्रामाः

प्रश्न **8.** **(क)** उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत **-** **( केवलं प्रश्नत्रयम् )** **(3X1=3)**

(i) नूनम् अस्मिन् ________ सः अस्तीति तर्कयामि। ( बिले/बिलात्/बिलस्य )
(ii) सर्वं कार्यं एकेनैव _____________ कर्तुं शक्यते। ( यन्त्रम्/यन्त्रेण/यन्त्राणि )
(iii) वृक्षः अवदत्-‘____________ अस्माकं छायायां विरमन्ति। ( मानवाय/मानवाः/मानवस्य )
(iv) वयं स्व __________ विषये ज्ञातुमिच्छामः। ( देशम्/देशे/देशस्य )

**(ख)** उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत **-** **( केवलं प्रश्नत्रयम् )** **(3X1=3)**
(i) वने सर्वे पशवः मिलित्वा _____________ स्म। (वस् धातुः, लट्लकारे)
(क) वसन्ति (ख) अवसत् (ग) वसतु

(ii) अहं प्रतिदिनं प्रातराशे दुग्धं _____________। (पा धातुः, उत्तमपुरुष-एकवचने)
(क) पास्यामः (ख) पास्यति (ग) पिबामि

(iii) सत्यं वद, धर्मं ___________ । (चर् धातुः, लोट्लकारे)
(क) चरति (ख) चर (ग) चरसि

(iv) त्वं कार्यम् ____________। ( कृ धातुः, मध्यमपुरुष-एकवचने )
अकरोः (ख) अकरोत् (ग) अकुरुत

खण्डः – ‘घ’

पठित-अवबोधनम् **( 22** अङ्काः **)**

प्रश्न **9.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत **-**

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशील इति। सूर्योऽचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः। सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः, स आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः। पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा। तेन उदाहृतं यद् गतिशीलायां नौकायाम् उपविष्टः मानवः नौकां स्थिरामनुभवति, अन्यान् च पदार्थान् गतिशीलान् अवगच्छति।

**(अ)** एकपदेन उत्तरत **-** **( केवलं प्रश्नमेकम् )** **1x1=1**

(i)सूर्यः कस्यां दिशायाम् उदेति ?

(ii) महान् गणितज्ञः ज्योतिर्विच्च कः आसीत् ?

https://www.evidyarthi.in/

**(ब)** पूर्णवाक्येन उत्तरत **-** **( केवलं प्रश्नमेकम् )** **2x1=2**

(i)परम्परया प्रचलिता का रूढिः आर्यभटेन प्रत्यादिष्टा ?

(ii)नौकायाम् उपविष्टः मानवः किम् अनुभवति ?

**(स)** प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत **-** **( केवलं प्रश्नद्वयम् )** **1x2=2**

1. 'सूर्यः अचलः अस्ति' – अत्र विशेषणपदं किम् ?

   (अ) अस्ति (ब) सूर्यः (स) अचलः

2. 'स्थिरा' इति पदस्य किं विपरीतार्थकपदं गद्यांशे प्रयुक्तम् ?

   (अ) चला (ब) अचला (स) प्रचलिता

3. 'धरा' इति पदस्य समानार्थकपदं गद्यांशात् चित्वा लिखत।

   (अ) परम्परा (ब) पृथिवी (स) स्थिरा

प्रश्न **10.** अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत **-**

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनः पूतं समाचरेत् ।।

**(अ)** एकपदेन उत्तरत **-** **( केवलं प्रश्नमेकम् )** **1x1=1**

(i)कीदृशं जलं पिबेत् ?

(ii) दृष्टिपूतं किं न्यसेत् ?

**(ब)** पूर्णवाक्येन उत्तरत **-** **( केवलं प्रश्नमेकम् )** **2x1=2**

(i)कथं समाचरेत् ?

(ii)कीदृशं वाचं वदेत् ?

**(स)** निर्देशानुसारं लिखत **-( केवलं प्रश्नद्वयम् )** **1x2=2**

1. 'वस्त्रपूतं जलं पिबेत्' – अत्र क्रियापदं किम् ?

   (अ) वस्त्रपूतम् (ब) जलम् (स) पिबेत्

2. 'चरणम्' इति शब्दस्य किं पर्यायपदं अस्मिन् श्लोके प्रयुक्तम् ?

   (अ) पादम् (ब) न्यसेत् (स) वाचम्

3. प्रदत्तविकल्पेभ्यः विशेषणपदं चिनुत –

   (अ) वदेत् (ब) सत्यपूताम् (स) पादम्

प्रश्न **11.** अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत **–**

मालती - महोदये! तत्र तु वंशवृक्षा अपि प्राप्यन्ते?

अध्यापिका - आम्। प्रदेशेऽस्मिन् हस्तशिल्पानां बाहुल्यं वर्तते। आवस्त्राभूषणेभ्यः गृहनिर्माणपर्यन्तं प्रायः वंशवृक्षनिर्मितानां वस्तूनाम् उपयोगः क्रियते। यतो हि अत्र वंशवृक्षाणां प्राचुर्यं विद्यते। साम्प्रतं वंशोद्योगोऽयं अन्ताराष्ट्रियख्यातिम् अवाप्तोऽस्ति।

अभिनवः - भगिनीप्रदेशोऽयं बह्वाकर्षकः इति प्रतीयते।

सलीमः - किं भ्रमणाय भगिनीप्रदेशोऽयं समीचीनः?

सर्वे छात्राः - (उच्चैः) महोदये! आगामिनि अवकाशे वयं तत्रैव गन्तुमिच्छामः।

स्वरा - भवत्यपि अस्माभिः सार्द्धं चलतु।

**(अ)** एकपदेन उत्तरत **-** **( केवलं प्रश्नमेकम् )** **(1x1=1)**

(i) भगिनीप्रदेशः कीदृशः प्रतीयते ?

(ii) सप्तभगिनीप्रदेशे केषां बाहुल्यं वर्तते ?

**(ब)** पूर्णवाक्येन उत्तरत **-** **( केवलं प्रश्नमेकम् )** **(1x2=2)**

(i) कः अन्ताराष्ट्रियख्यातिम् अवाप्तोऽस्ति ?

(ii) 'अस्माभिः सार्द्धं चलतु' इति का वदति ?

**(स)** यथानिर्देशम् उत्तरत **-** **( केवलं प्रश्नद्वयम् )** **(2x1=2)**

(i) 'वयं तत्रैव गन्तुम् इच्छामः' – अत्र कर्तृपदं किम् अस्ति ?

(क) तत्रैव (ख) वयम् (ग) इच्छामः

ये(ii) 'अयं भगिनीप्रदेशः बह्वाकर्षकः' -अत्र विशेषणपदं किम् अस्ति ?

(क) अयम् (ख) भगिनीप्रदेशः (ग) बह्वाकर्षकः

(iii) 'अस्माभिः सार्द्धं चलतु' -अत्र क्रियापदं किम् अस्ति ?

(क) सार्द्धम् (ख) चलतु (ग) अस्माकम्

प्रश्न **12.** मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखित-पद्यस्य अन्वयं पूरयत **-** **(3x1=3)**

चल चल पुरतो निधेहि चरणम्

सदैव पुरतो निधेहि चरणम् ।

गिरिशिखरे ननु निजनिकेतनम्

विनैव यानं नगारोहणम्

बलं स्वकीयं भवति साधनम् ।।

अन्वयः – चल चल पुरतः (1)___________ निधेहि, सदैव पुरतः चरणं निधेहि। निजनिकेतनं ननु गिरिशिखरे (स्यात्), यानं (2)_________ एव नगारोहणम् (स्यात्)। स्वकीयं (3)________ (एव) साधनं भवति।

मञ्जूषा -

https://www.evidyarthi.in/

| |
|---|
| बलम्   चरणम्   विना |

प्रश्न **13.** स्वपाठ्यपुस्तकात् द्वौ श्लोकौ लिखत( प्रश्न-पत्रात् अतिरिच्य) **2x2=4**

**---------------------------------**